# Chandramaulishvara Varnamala Stotram

# ચન્દ્રમૌલીશ્વરવર્ણમાલાસ્તોત્રમ્

## Document Information

Text title : Chandramaulishvara Varnamala Stotram

File name : chandramaulIshvaravarNamAlAstotram.itx

Category : shiva

Location : doc_shiva

Acknowledge-Permission: Sringeri Math https://www.sringeri.net/

Latest update : May 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 13, 2025

*sanskritdocuments.org*

# ચન્દ્રમૌલીશ્વરવર્ણમાલાસ્તોત્રમ્

શ્રીશાત્મભૂમુખ્યસુરાર્ચિતાઙ્ઘ્રિં શ્રીકણ્ઠશર્વાદિપદાભિધેયમ્ ।
શ્રીશઙ્કરાચાર્યહૃદબ્જવાસં શ્રીચન્દ્રમૌલીશમહં નમામિ ॥ ૧॥

ચણ્ડાંશુશીતાંશુકૃશાનુનેત્રં ચણ્ડીશમુખ્યપ્રમથેડ્યપાદમ્ ।
ષડાસ્યનાગાસ્યસુશોભિપાર્શ્વં શ્રીચન્દ્રમૌલીશમહં નમામિ ॥ ૨॥

દ્રવ્યાદિસૃષ્ટિસ્થિતિનાશહેતું રવ્યાદિતેજાંસ્યપિ ભાસયન્તમ્ ।
પવ્યાયુધાદિસ્તુતવૈભવં તં શ્રીચન્દ્રમૌલીશમહં નમામિ ॥ ૩॥

મૌલિસ્ફુરજ્જહ્નુસુતાસિતાંશું વ્યાલેશસંવેષ્ટિતપાણિપાદમ્ ।
શૂલાદિનાનાયુધશોભમાનં શ્રીચન્દ્રમૌલીશમહં નમામિ ॥ ૪॥

લીલાવિનિર્ધૂતકૃતાન્તદર્પં શૈલાત્મજાસંશ્રિતવામભાગમ્ ।
શૂલાગ્રનિર્ભિન્નસુરારિસઙ્ઘં શ્રીચન્દ્રમૌલીશમહં નમામિ ॥ ૫॥

શતૈઃ શ્રુતીનાં પરિગીયમાનં યતૈર્મુનીન્દ્રૈઃ પરિસેવ્યમાનમ્ ।
નતૈઃ સુરેન્દ્રૈરભિપૂજ્યમાનં શ્રીચન્દ્રમૌલીશમહં નમામિ ॥ ૬॥

મત્તેભકૃત્યા પરિશોભિતાઙ્ગં ચિત્તે યતીનાં સતતં વસન્તમ્ ।
વિત્તેશમુખ્યૈઃ પરિવેષ્ટિતં તં શ્રીચન્દ્રમૌલીશમહં નમામિ ॥ ૭॥

હંસોત્તમૈઃ ચેતસિ ચિન્ત્યમાનં સંસારપાથોનિધિકર્ણધારમ્ ।
તં સામગાનપ્રિયમષ્ટમૂર્તિં શ્રીચન્દ્રમૌલીશમહં નમામિ ॥ ૮॥

નતાઘહં નિત્યચિદેકરૂપં સતાં ગતિં સત્યસુખસ્વરૂપમ્ ।
હતાન્ધકં હૃદ્યપરાક્રમં તં શ્રીચન્દ્રમૌલીશમહં નમામિ ॥ ૯॥

માયાતિગં વીતભયં વિનિદ્રં મોહાન્તકં મૃત્યુહરં મહેશમ્ ।
કાલાનલં નીલગલં કૃપાલું શ્રીચન્દ્રમૌલીશમહં નમામિ ॥ ૧૦॥

મિત્રં હિ યસ્યાખિલશેવધીશઃ પુત્રશ્ચ વિઘ્નૌઘવિભેદદક્ષઃ ।
પાત્રં કૃપાયાશ્ચ સમસ્તલોકઃ શ્રીચન્દ્રમૌલીશમહં નમામિ ॥ ૧૧॥

ઇતિ ચન્દ્રમૌલીશ્વરવર્ણમાલાસ્તોત્રં સમ્પૂર્ણમ્ ।

*Chandramaulishvara Varnamala Stotram*

pdf was typeset on May 13, 2025

Please send corrections to *sanskrit@cheerful.com*